# शास्त्रप्रशिक्षणवर्गः

(न्यायव्याकरणाद्वैतवेदान्तशास्त्रेषु)

**देवप्रयागः- जयपुरम्- शृङ्गेरी**

(२०/०५/२०२४ तः १९/०६/२०२४ पर्यन्तम्)

## समापनसमारोहः

**शास्त्रार्थसभासु बालिकाभ्यः अवसरः न कल्प्यते इत्ययथार्थज्ञानमात्रम्**

- आचार्यः श्रीनिवासः वरखेडी




**१९/०६/२४**

शास्त्रपण्डिताः शास्त्रार्थसभासु बालिकानां प्रवेशं न्यूनमात्रेण प्रोत्साहयन्ति पुनश्च वाक्यार्थावसरादिकं आधिक्येन न कल्पयन्ति इत्येवं मुधैव केचन आक्षिपन्ति। परं वास्तविकतां ज्ञातुं ते अस्माकं विश्वविद्यालयम् आयान्तु। अत्रत्यान् शास्त्रप्रशिक्षणवर्गादीन् क्रियाविशेषान् चापि मनाक् अवलोकयन्तु। तेनैव यथार्थज्ञानमुपजायते।

**आचार्यात् पादमाधत्ते पादं शिष्यः स्वमेधया ।**

**पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ।।** इति सुभाषितमात्रम् ।

कालक्रमेण अपि अर्जयितुम् अशक्यं ज्ञानं गुर्वनुग्रहेण सम्प्राप्तुं शक्यते एव। अद्य प्रशिक्षणं प्राप्तवतां छात्राणां शास्त्रार्थकौशलं दूरादेव दृष्ट्वा नितरां तृप्तोऽहम्। एतादृशवर्गस्य आयोजनाय शास्त्रपोषकमण्डली अस्माभिः आरचिता अस्ति। अस्याः अध्यक्षाः सदस्याश्च केचन अद्य जयपुरवर्गे एकत्रिताः सन्ति। एतेषां करकमलेषु निक्षिप्ताः एतैः चिताश्च प्रशिक्षणार्थिनः लब्धप्रतिष्ठैः विद्वद्भिः आमासं सुप्रशिक्षिताः अभवन्। प्रशिक्षिताः अग्रे शास्त्ररक्षां परम्परया राष्ट्ररक्षां च करिष्यन्ति। अतः साध्यक्षसदस्याः समन्वयकसहसमन्वयकाश्च अभिनन्दनार्हा एव।

मत्प्रियाः छात्राः भवन्तः विद्यया सह विनयमपि अर्जयन्तु। विद्या विनयेन विना न शोभते। किञ्च गुर्वनुग्रहोऽपि यत्नेन सम्पादनीयः।

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रं श्रुतमेव। प्रातिपदिकस्थानीयोऽहम् अर्थवन्तश्च (शास्त्रार्थवन्तश्च) यूयम्। अतः भवन्तः भवत्यश्च सर्वदा सर्वथा च श्लाघ्या एव। अयं वर्गः सुष्ठु सम्पन्न इत्यतः कुलपतित्वेनापि धन्यताभावमनुभवामि। विशिष्य शास्त्रपोषकमण्डल्याः साध्यक्ष्यसदस्यान् समन्वयकान् संयोजकान् परिसरनिदेशकान् विशेषज्ञान् च साधुवाक्यैः प्रोत्साहयामि।

**॥ भवतु शुभं समेषाम् ॥**

वार्तासारसङ्ग्रहः –

डॉ. गणेश ति. पण्डितः

डॉ. अमृता कौर

# केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन स्थापितः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्यां प्रत्यायितः

ACCREDITED WITH GRADE A++ 3.60 CGPA NAAC

## अखिलभारतीय-शास्त्रप्रशिक्षणवर्गः

### सम्पूर्तिसत्रम्

श्रीक्रोधि/कालयुक्तनामसंवत्सरस्य ज्येष्ठमासस्य शुक्लपक्षे द्वादश्यां तिथौ बुधवासरे प्रातः ९:०० वादनतः

(दिनाङ्कः 19-06-2024, समयः - प्रातः 9:00 वादनात्)

**अध्यक्षः**

**आचार्यः श्रीनिवासः वरखेडी**

कुलपतिः

केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली

**मुख्यातिथिः**

**आचार्यः के. ई. देवनाथन्**

कुलपतिचरः, कर्णाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु

**विशिष्टातिथिः**

**आचार्यः ब्रजभूषणओझाः**

बनारसहिन्दुविश्वविद्यालयः, वाराणसी

**जयपुरपरिसरनिदेशकः**

**आचार्यः सुदेशकुमारशर्मा**

**राष्ट्रियसंयोजकः**

**आचार्यः कुलदीपशर्मा**

**कार्यक्रमेऽस्मिन् तत्रभवतां भवतां हार्दं स्वागतम्**

**आयोजनसमितिः**

आचार्यः नवीनहोल्ला (शृङ्गेरीपरिसरः)

आचार्यः गणेश ईश्वरभट्टः (शृङ्गेरीपरिसरः)

आचार्यः विष्णुकान्तपाण्डेयः (जयपुरपरिसरः)

आचार्यः सच्चिदानन्दस्नेही (देवप्रयागपरिसरः)

आचार्यः गणेश टि. पण्डितः (के.सं.वि., देहली)

डॉ. अमृता कौर (के.सं.वि., देहली)

कार्यक्रमं द्रष्टुं कृपया स्केन कुर्वन्तु

https://meet.google.com/txo-frod-npi

**– :: स्थानम् :: –**

केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः

श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः

श्रीराजीवगान्धिपरिसरः, शृङ्गेरी

# कार्यक्रमविवरणम्

दिनाङ्कः 19-06-2024

समयः - प्रातः 9:00 वादनात्



- वैदिकमङ्गलाचरणम्, दीपदीपनं सरस्वतीपूजनञ्च ।
- कुलगीतम्
- अतिथीनां स्वागतम्
- वाचिकं स्वागतम् - आचार्यः विष्णुकान्तपाण्डेयः
- प्रतिवेदनम् – आचार्यः कुलदीपशर्मा
- शास्त्रार्थोपस्थापनम् –
  - जयपुरपरिसरात् व्याकरणशास्त्रवर्गविद्यार्थिनः
  - श्रीरघुनाथकीर्तिपरिसरात् न्यायशास्त्रवर्गविद्यार्थिनः
  - श्रीराजीवगान्धीपरिसरात् अद्वैतवेदान्तवर्गविद्यार्थिनः
- अद्वैतवेदान्तवर्गस्य छात्राणां पक्षतः शिक्षणप्रदर्शनम् (PPT Presentation)
- वर्गस्य वृत्तचित्रप्रदर्शनम्, जयपुरपरिसरः

  अतिथीनाम् उद्बोधनम्
- मुख्यातिथिः – आचार्यः का. ई. देवनाथन्
- प्रतिवेदनविमोचनम् (अतिथिभिः)
- अनुभवकथनम् (परिसरत्रयात् एकैकः प्रशिक्षणार्थी)
- विशिष्टातिथिः – आचार्यः ब्रजभूषणओझाः
- प्रत्येकं शास्त्रवर्गस्य विजेतॄणां नामोद्घोषणा पुरस्कारराशिवितरणञ्च
- शलाकापरीक्षायां विजेतॄणां नामोद्घोषणा प्रमाणपत्रप्रदानञ्च
- अध्यक्षीयम् उद्बोधनम् - आचार्यः श्रीनिवासः वरखेडी
- प्रतिभागितायाः प्रमाणपत्रवितरणम् (परिसरनिदेशकेन अतिथिभिश्च) - डॉ.किरणखींची
- परिसरनिदेशकानां समुद्बोधनम् – प्रो. सुदेशकुमारशर्मा (जयपुरपरिसरः),

  प्रो. हंसधरझाः (शृङ्गेरीपरिसरः), प्रो.पि.वि.बि. सुब्रह्मण्यम् (देवप्रयागपरिसरः)
- धन्यवादज्ञापनम् – श्रीनरेशसिंहः
- राष्ट्रगानम्



सञ्चालकः

डॉ. कार्तिकभागवतः